## प्रशंसावचनैश्च । (६६/७४७)

जातिः इति वर्तते । जातिवाचि सुबन्तं प्रशंसावचनैः सह समस्यते, तत्पुरुषश्च समासो भवति । रूढिशब्दाः प्रशंसावचना गृह्यन्ते मतल्लिकादयः । ते च आविष्टलिङ्गत्वादन्यलिङ्गेऽपि जातिशब्दे [1]स्वलिङ्गोपादाना एव समानाधिकरणा भवन्ति । गोप्रकाण्डम् । अश्वप्रकाण्डम् । गोमतल्लिका[2] । [3]अश्वमतल्लिका । गोमर्चचिका । [4]अश्वमर्चचिका । जातिः इति किम् ? कुमारी मतल्लिका ॥

## युवा खलतिपलितवलिनजरतीभिः । (६७/४८७)

खलत्यादिभिः समानाधिकरणैः सह [5]युवशब्दः समस्यते, तत्पुरुषश्च समासो भवति । [6]जरतीभिः इति स्त्रीलिङ्गेन[7] निर्देशः, 'प्रातिपादिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्'[8] (व्या. प. २५) इति ज्ञापकार्थः । युवा खलतिः युवखलतिः । युवतिः खलती युवखलती । युवा पलितः युवपलितः । युवतिः पलिता युवपलिता । युवा वलिनः युववलिनः । युवतिर्वलिना युववलिना । युवा जरन् युवजरन् । युवतिर्जरती युवजरती ॥

## कृत्यतुल्याख्या अजात्या । (६८/७४९)

कृत्यप्रत्ययान्तास्तुल्यपर्यायाश्च [10]सुबन्ता अजातिवचनेन समस्यन्ते, तत्पुरुषश्च समासो भवति । भोज्योष्णम् । भोज्यलवणम् । पानीयशीतम् । तुल्याख्याः – तुल्यश्वेतः । तुल्यमहान् । सदृशश्वेतः । सदृशमहान् । अजात्या इति किम् ? भोज्य ओदनः ॥

## वर्णो वर्णेन । (६९/७५०)

वर्णविशेषवाचि सुबन्तं वर्णविशेषवाचिना सुबन्तेन समानाधिकरणेन सह समस्यते, तत्पुरुषश्च समासो भवति । कृष्णसारङ्गः । लोहितसारङ्गः । कृष्णशबलः । [11]लोहितशबलः । अवयवद्वारेण कृष्णशब्दः समुदाये वर्तमानः समानाधिकरणो भवति ॥

## कुमारः श्रमणादिभिः । (७०/७५२)

कुमारशब्दः श्रमणादिभिः सह समस्यते, तत्पुरुषश्च समासो भवति । [12]येऽत्र स्त्रीलिङ्गाः पठ्यन्ते, श्रमणा, प्रव्रजिता, कुलटा[13] इत्येवमादयः, तैः सह स्त्रीलिङ्गः एव कुमारशब्दः समस्यते । ये तु पुंलिङ्गाः, [14]अध्यापकः, अभिरूपकः, पण्डितः इति, तैरुभयथा[15], 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्[16]' (व्या. प. २५) इति । कुमारी श्रमणा कुमारश्रमणा[17] ।

श्रमणा । प्रव्रजिता । कुलटा । गर्भिणी । [18]तापसी । दासी । बन्धकी । अध्यापक । अभिरूपक । पण्डित । पटु । मृदु । कुशल । चपल । निपुण ॥

---

1. °उपदान एव ड. 2. गोमतल्लजा इत्यधिकम् फ. 3. अश्वमतल्लिका, गोमर्चचिका नास्ति फ. 4. अश्वप्रचर्चिका ब, अश्वमचर्चकः क. 5. युवन्शब्दः फ. 6. जरतीति क. 7. स्त्रीलिङ्गे ह. 8. भवति इत्यधिकम् क. ह. 9. शब्दाः क. 10. सुपा सह इत्यधिकम् क. ड. फ, सुबन्ताजातिवचनेन ब, अजातिवाचिना सुपा समानाधिकरणेन सह ह. 11. नास्ति फ. 12. ये च ब. क. 13. दासी बन्धकी इत्यधिकम् ह. 14. अध्यापकाभिरूपकःपण्डिताः फ. 15. भवति इत्यधिकम् इ. फ. 16. भवति इत्यधिकम् क. ड. इ. ह. 17. कुमारी चासौ प्रव्रजिता कुमारप्रव्रजिता इत्यधिकम् क. फ. 18. तामसी ब.